कक्षा – VIII

# अभ्यासकार्यपत्रकम् – 1

## संकलनात्मक–मूल्यांकनम् –प्रथमम्

समयः होरात्रयम् पूर्णाङ्काः 90

निर्देषाः

प्रष्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) सर्वे प्रष्नाः अनिवार्याः।

(iii) प्रष्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

(iv) प्रष्नसंख्या अवष्यं लेखनीया।

(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।

### खण्डः(क)

### अपठित – अवबोधनम्

1. अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानां निर्देशानुसारं उत्तराणि लिखत–

हल्दीघाटी युद्धं समाप्तं अभवत्। मेवाडाधिपतिः महाराणाप्रतापः पराजितः जातः। सम्पूर्णरूपेण संकटमापतितम्। मेवाडाधिपतिः महाराणाप्रतापः अरण्ये कतिपयैः विश्वासपात्रैः भटैः सह संकटापन्ने काले विचारमग्नः शिलायाम् उपविष्टः अस्ति। स्वदेशस्य रक्षायै युध्यमानस्य तस्य बहूनि वर्षाणि व्यतीतानि। हन्त! वराकस्य पार्श्वे सेनायाः भोजनसामग्र्याः च अभावः विद्यते। अधुना तु सः स्वकीयैः प्राणैरेव स्वदेशं स्वतंत्रं कर्तुम् इच्छति। किन्तु महादानी भामाशाहस्य सहयोगेन विजयतां स्वदेशः इति भावेन सः पुनः युद्धं कृत्वा स्वदेशं स्वतंत्रं कृतवान्। सत्यमेवोक्तम् – वीरभोग्या वसुन्धरा

Edufever™

(I) एकपदेन उत्तरत– 1/2X2=1

(क) स्वदेशं कः स्वतंत्रं कर्तुम् इच्छति ?

(ख) महाराणाप्रतापः कुत्र उपविष्टः अस्ति ?

(II) पूर्णवाक्येन उत्तरत– 1X2=2

(ग) वराकस्य पार्श्वे कयोः अभावः विद्यते ?

(घ) महाराणाप्रतापः कैः सह विचारमग्नः उपविष्टः अस्ति ?

(III) निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1/2X4=2

(ङ) मेवाडाधिपतिः पदं कस्य विशेषणपदम् ?

(अ) भटस्य (ब) प्रतापस्य (स) वराकस्य (द) वसुन्धरायाः

(च) हन्त ! पदे का विभक्तिः ?

(अ) द्वितीया (ब) तृतीया (स) प्रथमा (द) सम्बोधन

(छ) कर्तुम् पदे कः प्रत्ययः ?

(अ) ल्यप् (ब) तुमुन् (स) क्त (द) क्त्वा

(ज) भावः इत्यस्य किं विलोमपदं अनुच्छेदे प्रयुक्तम् ?

(अ) विभावः (ब) प्रभावः (स) अभावः (द) स्वभावः

## खण्डः 'ख ' रचनात्मकं कार्यम्

2. मंजूषायां प्रदत्त–शब्दानां सहायतया चित्रं दृष्ट्वा चत्वारि वाक्यानि संस्कृतेन लिखत् 1X5=5



मंजूषा

| |
|---|
| छात्राः, आनन्दवर्धकः, वृक्षाः, यज्ञः, पठति, वातावरणं, संस्कृतिः, सावधानाः, वैज्ञानिकाः, ध्यानेन, जीवनं |

अथवा

स्वविद्यालये भवता/भवत्या प्रथमवारं प्रार्थनासभायाः पूर्णतः संस्कृतेन आयोजनं कृतम्। स्वमनोदषां वर्णयन् पंच वाक्यानि संस्कृतेन मंजूषापदसहायतया लिखतु।

मंजूषा –

| |
|---|
| मार्गदर्षनेन, चित्तं, व्याकुलं, कम्पेते, अतीव, साधु, आमविष्वासः, जागृतः, करतलध्वनिं, प्रसन्नौ, आदेषेन |

3. प्राचार्यमहोदयं प्रति अवकाषार्थं लिखितं निम्नलिखितं पत्रं मंजूषायां प्रदत्तैः षब्दैः पूरयत्। 5

प्रतिष्ठायाम्

आदरणीयाः (1) .................. महोदयाः

''श्री सरस्वती षिषु मन्दिर'' विदिषा (म.प्र.)

विषयः – (2) ...................................... प्रार्थना पत्रम्

(3)..................................

सेवायां (4) .................. निवेदनमस्ति यद् (5) ..................... अद्य सहसा (6) ....................... अस्मि । अतएव (7)..................आगन्तुं सर्वथा असमर्था अस्मि।

अतः कृपया मम पंचदिवसानां (सप्तदिनांकतः –(8) .................. दिनांकपर्यन्तम्) अवकाषं स्वीकुर्वन्तु।

दिनाङ्कः – 11/12/2012

भवदीया (9).............

ऋचा कुमारी

(10) ......... –सप्तमी

| |
|---|
| ज्वरपीडिता, एकादष, विद्यालयम्, अहम्, षिष्या, कक्षा, प्राचार्य, महोदय!, अवकाषार्थं, सविनयं |

Edufever™

4. मंजूषायां प्रदत्त–शब्दानां सहायतया निम्नलिखितं संवादं पूरयतु। 5

| |
|---|
| कारागारः , आजादः , भारतम् , तव , पितुः , कुत्र , सः , आजादः , चन्द्रषेखरः , संगठनम् , स्वाधीनः |

आचार्यः – प्रथमं तु चन्द्रषेखरन्यायाषोः संवादं श्रुणुत –
न्यायाधीषः – किं ............................................... नाम ?
चन्द्रषेखरः – .......................................... ।
न्यायाधीषः – किं तव ............................................... नाम ?
चन्द्रषेखरः – .......................................... ।
न्यायाधीषः – ............................................... तव गृहम् ?
चन्द्रषेखरः – .......................................... ।
अमृतः – ततस्ततः ?
आचार्यः –ततस्तु वैत्रप्रहारैः चन्द्रषेखरः मूर्छापर्यन्तं 'जयतु .......................................... इति उच्चैः अघोषयत् ।
तस्मात् कालादेव '...............................' इति नाम्ना प्रसिद्धः ।
ऋतम्भरा – स्वतन्त्रतायै ...................................... किं कृतवान् ?
आचार्यः – तेन 'हिन्दुस्तान सोसलिस्ट रिपब्लिकन आर्मी ' इति स्वाधीनतासैनिकानाम् एकं .................कृतम् ।

**कक्षा – VIII**

## अभ्यासकार्यपत्रकम् – 2

## संकलनात्मक–मूल्यांकनम् –प्रथमम्

**समयः ............** **पूर्णाङ्काः ...............**

**निर्देषाः**

**(ii) सर्वे प्रष्नाः अनिवार्याः।**
**(iii) प्रष्नानाम् उत्तराणि क्रमेणैव लेखनीयानि ।**
**(iv) प्रष्नसंख्या अवष्यं लेखनीया।**
**(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।**

**खण्डः 'ग ' 'अनुप्रयुक्त व्याकरणम्' 35 अंकाः**

5 :– अधोलिखित वाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा करोतु –

(i) सः प्रतिदिनं देवालयं गच्छति ।

(ii) रमेषः असत्यं न वदति ।

(iii) सूर्योदये सूर्यार्घ्यं अवष्यं दातव्यम्।

Edufever™

6 .अ :— उचित— पदस्य चयनं कृत्वा लिखत —

क— .......... भ्राता लक्ष्मणः अस्ति ।

1. रामयोः 2. रामाय 3. रामस्य 4. रामम्

ख. राधा........जलम् आनयति ।

1. नद्याः 2. नदीभ्याम् 3. नदी 4. नदीभिः

ग. .............पत्राणि पतन्ति ।

1. लतायाः 2. लताभिः 3. लताम् 4. लतयोः

घ. ..........नाम किम् अस्ति ?

1. भवन्तम् 2. भवान् 3. भवतः 4. भवतौ

ड. आम्रं........ मधुरतमम् अस्ति ।

1. फलस्य 2. फलयोः 3. फलेषु 4. फलेभ्यः

च. मोहन.........अपि खादति ।

1. गच्छता 2. गच्छन्तः 3. गच्छन्तम् 4. गच्छन्

Edufever™

आ :— उचित —पदस्य चयनं कृत्वा लिखत —

क. .........बाला नाटकं पष्यन्ति ।

1. सर्वः 2. सर्वम् 3. सर्वे 4. सवा

ख........ क्रीडितुं कुत्र गच्छसि?

1. यूयम् 2. त्वम् 3. यूवाम् 4. युवयों

ग. अथ...........जन्मदिवसः अस्ति

1. अहम् 2.मम 3. आवाम् 4.मया

7. अः— अधोलिखित वाक्येषु कोष्ठके प्रदत्तसंख्यां संस्कृतन लिखत —

क. मम वाटिकायाम्.........(49) वृक्षाः सन्ति।

ख. नगरात् वहिः........(26) जनाः वसन्ति ।

आः– उचितसंख्यावाचकं पदं चित्वा रिक्तस्थानानि पूरयत –

क. कालिदासस्य........नाटकानि सन्ति ।

1. त्रयः 2. तिस्रः 3. त्रीणि 4. त्रि

ख. पर्यटकेषु..............दिल्लनिवासी आसीत् ।

1. एकम् 2. एकः 3. एका 4. एकस्मिन्

8. मज्जूषायां प्रदत्तैः अव्ययषब्दैः रिक्तस्थानानि पूरयत–

1. चटका .............वदति।

2. चटकायाः गृहम् ...........नष्टम् अभवत् ।

3. ...............अध्यापकः कक्षायां प्रविषति ।

| अपि, तदा , उच्चैः |
|---|

9. रेखाडि्कतपदेषु उपसर्गं पृथक् कृत्वा संयोज्य .वा विभज्य लिखत–

1. षुकः आकाषे उत्पतति।
2. सर्वे छात्राः उप+विषन्तु ।
3. षिष्यः गुरुम् अनुगच्छति ।

10. रेखाडि्कतपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत –

1. सः <u>नेत्रेण</u> काणः अस्ति ।

2. <u>विद्यालयम्</u> उभयतः वृक्षाः सन्ति ।

3. <u>संस्कृतं</u> विना नैव संस्कृतिः ।

4. अहम् <u>उद्यानम्</u> प्रति गच्छामि ।

5. अलं <u>विवादेन</u>।

11. समस्तपदानां नामानि लिखत–

1. सीतारामौ ।

2. षरणागतः ।

3. राजपुत्रम्  ।

12. कोष्ठकप्रदत्तेषु धातुरुपेषु उचितं रुपं चित्वा रिक्तस्थानानि पूरयत् –

( क) यूयं कदा क्रीडाक्षेत्रम्.................?

1. गच्छथ 2. गच्छथः 3. गच्छसि 4. गच्छन्ति

(ख. ) आवां मिलित्वा अत्र ................।

1. स्थास्यामः 2. स्थास्यावः 3. स्थस्यामि 4. स्थास्यति

(ग. ) मम समीपे चत्वारि रुप्यकाणि ................।

1. स्तः 2. अस्मि 3. सन्ति 4. अस्ति

(घ.) मह्यं मोदकं ............।

1. रोचध्वे 2. रोचन्ते 3. रोचते 4. रोचेते

(ङ.) अहम् आकाषे विमानं ........।

1. पष्यावः 2. पष्यामः 3. पष्यामि 4. पष्यति

Edufever TM

13. अधोलिखितवाक्यषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत ।

1. सः कार्य कृत्वा पाठं पठति ।

2. रमेषः पाठं पठ्+क्त्वा आगच्छति ।

3. अहं खादन् गच्छामि ।

4. अहं पितरौ प्रणम्य विघालयं गच्छामि ।

कक्षा – VIII

## अभ्यासकार्यपत्रकम् – 3

## संकलनात्मक–मूल्यांकनम् –प्रथमम्

**समयः ............ पूर्णाङ्.काः .................**

**निर्देषाः**

**(ii) सर्वे प्रष्नाः अनिवार्याः।**
**(iii) प्रष्नानाम् उत्तराणि क्रमेणैव लेखनीयानि ।**
**(iv) प्रष्नसंख्या अवष्यं लेखनीया।**
**(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।**

खण्ड–घ (पठित–अवबोधनम्) 35

14. (अ) अधोलिखितं गद्यांषं पठित्वा प्रनानाम् उत्तराणि लिखत–

अहं नदी अस्मि। अहम् अस्याः वसुन्धरायाःसौन्दर्यम् अस्मि। मम साम्राज्यं सम्पूर्णे विष्वे अस्ति। अहं माता इव सम्पूर्णं विष्वं पालयामि । पर्वतानाम् उच्चेभ्यः स्थलेभ्यः निःसृत्य अहं सागरं प्रविषामि । अहं सर्वदा गतिषीला अस्मि। गतिः एव मम स्वभावः मम सन्देषः चः। मम तटेषु एव महानगराणां विकासः भवति ।

प्रष्नाः –

1. एकपदेन उत्तरत –
   क. नदी कुतः निःसृत्य सागरं प्रविषति ?
   ख. नदी कस्याः सौन्दर्यम् अस्ति ?
2. पूर्णवाक्येन उत्तर–
   क. नद्या तटेषु किं भवति ?
   ख. नद्याः सन्देषः कः ?
3. निर्देषानुसारम् उत्तरं चित्वा उत्तरत
   क. 'प्रविषामि' इति क्रियापदस्य कर्तृपदं किम् ?
   1. नदी 2. सागरम् 3. अहम् 4. माता
   ख. 'पृथिव्याः' इति अर्थे गद्यांषे किं पदं प्रयुक्तम् ?
   1. वसुन्धुरायाः 2. सौन्दर्यम् 3. अस्याः 4. अस्मि
   ग. ' विष्वे' इति पदस्य विषेषणपदं किम् ?
   1. अस्ति 2. मम 3. साम्राज्यं 4. सम्पूर्णे
   घ. 'गतिः एव मम स्वभावः' अत्र अव्ययपदं किम् ?
   1. स्वभावः 2. एव 3. मम 4. गतिः

आ. अधोलिखितं ष्लोकं पठित्वा प्रनानाम् उत्तराणि लिखत–

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविषतु गच्छतु वा यथेष्टम्।
अद्यैव मरणमस्तु युगान्तरे वा ,

Edufever™

न्यायात्पथः प्रविचलन्ति पदं न धीराः।

1. एकपदेन उत्तरत –
    1. मरणं कदा भवतु ?
    2. का यथेष्टम् समाविषतु ?
2. पूर्णवाक्येन उत्तर–
    1. धीराः कस्मात् पथः न प्रविचलन्ति ?
    2. नीतिनिपुणाः किं किं कुर्वन्तु ?
3. निर्देषानुसारम् उत्तरं –

क. ' जीवनम्' इति षब्दस्य विलोमपदं किम् अस्ति ?

1. मरणम्  2. अस्तु  3. अद्य  4. युगान्तरे

ख. 'प्रषंसां कुर्वन्तु' इति अर्थे किं पदं प्रयुक्तम् ?

1. गच्छन्तु  2. स्तुवन्तु  3. निन्दन्तु  4. समाविषन्तु

ग. 'मरणं युगान्तरे वा' अत्र अव्ययपदं किम् ?

1. अस्तु  2. मरणम्  3. युगान्तरे  4. वा

घ. ' प्रविचलन्ति' इति कियापदस्य कर्तृपदं किम् ?

1. पथः  2. पदम्  3. धीराः  4. न्याय्यात्

इ. अधोलिखितं संवादं पठित्वा प्रनानाम् उत्तराणि लिखत–

सुषान्तः – भो मित्राणि! किं भवन्तः जानन्ति अद्य का तिथिः अस्ति ?

गरिमा – आम्, अहं जानामि। अद्य श्रावणमासस्य पूर्णिमा तिथिः अस्ति ।

प्रषान्तः – वयम् इदम् अपि जानीमः यत् प्रतिवर्षं श्रावणमासस्य पूर्णिमायां 'संस्कृतदिवसः' आयोज्यते।(तदैव अध्यापकः कक्षां प्रविषति )

सर्वे छात्राः –( उत्थाय) हे आचार्य! संस्कृतदिवसे वयं भवन्तं वर्धापयामः।

आचार्यः – धन्यवादाः। स्वस्ति युष्मभ्यम् । षुभं भवतु संस्कृतदिवसे युष्मभ्यं सर्वेभ्यः।

प्रणवः – आचार्यः ! अद्य अस्माभिः संस्कृतविषयेएका प्रष्नोत्तरी आयोजिता अस्ति ।

सुमेधा – सम्पूर्णा कक्षा द्वयोः वर्गयोः विभक्ता अस्ति । एकः कालिदासवर्गः अपरः च भासवर्गः अस्ति।

1. एकपदेन उत्तरत –
    1. संस्कृतदिवसः कदा आयोज्यते ?
    2. कक्षां कः प्रविषति ?
2. पूर्णवाक्येन उत्तर–
    1. अद्य का तिथिः ?
    2. द्वयोः वर्गयोः किं नाम अस्ति ?
3. निर्देषानुसारम् उचितम् उत्तरं चित्वा लिखत –

क. ' वर्धापयामः इति कियापदस्य कृर्तपदं किम् अस्ति ?

1. दिवसः  2. आचार्यः  3. भवन्तम्  4. वयम्

ख. 'तिथिः' षब्दस्य विषेषणं पदं किम् अस्ति ।

1. अद्य  2. अस्ति  3. पूर्णिमा  4. मासस्य

ग. 'अस्माभिः' इति पदं केभ्यः प्रयुक्तम् ?

1. अस्मभ्यम्  2. आचार्येभ्यः  3. छात्रेभ्यः  4. प्रष्नोत्तरेभ्यः

Edufever™

घ. 'रात्रिः' इति पदस्य विलोमपदं किम् ?

1. निषा 2. मासः 3. दिवसः 4. षुभम्

15. मञ्जूषायां प्रदत्तै प्रदै भावार्थं पूरयत–

अ. सर्वस्य लोचनं षास्त्रम् ।

भावार्थः– ष्षास्त्राणां ज्ञानम् एव मनुष्यस्य वास्तविकं ............अस्ति । ज्ञानषक्त्या एव ................ कार्याणि सिध्यन्ति। अतः षास्त्राणां ज्ञानं प्राप्तुं सदैव तत्पराः भवेयु।

आ. षरीरमाद्यं खलु धर्मसाधनम्।

भावार्थः– वयं सर्वाणि कार्याणि ............एव कुर्मः। षरीरम् एव अस्माकं सर्वेषाम् एव ..........................प्रमुखं साधनम् अस्ति ।

| षरीरेण, नेत्रम्, कर्तव्यानां, मानवस्य |
|---|

16. ष्लोकं पठित्वा उचितपदैः अन्वयं पूरयत्–

अ. गर्जति षरदि न वर्षति वर्षासु निःस्वनो मेघः।
नीचो वदति न कुरुते न वदति सुजनः करोत्येव।।

अन्वयः– मेद्यः षरदि केवलं............ वर्षति न । वर्षासु (सः) ............(वर्षति)। नीचः..........................एव कुरुते न,.................करोति वदति न।

आ. सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पष्यन्तु मा कष्चित् दुःखभाग् भवेत्।।

अन्वयः– सर्वे............. भवन्तु ,सर्वे................ सन्तु ,सर्वे.......... पष्यन्तु कष्चित्......... मा भवेत्।

17. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत–

क. वयं नद्याः जलम् दूषितं न कुर्मः।
ख. नद्याः तटे महानगराणि भवन्ति।
ग. सर्वकारः नद्याः जलसच्चयं करोति।
घ. आरम्भे नद्याः जलं पोष्कषक्त्या पापूर्णं भवति।
ड. नदी वसुन्धरायाः सौन्दर्यम् अस्ति।

18. अधोलिखितेषु कथनेषु रेखाडि.कतपदानि आकृत्य प्रष्ननिर्माण कुरुत–

क. ग्रीष्मकाले <u>सर्वत्र</u> षुष्कम् अभवत्।
ख. वयं <u>संस्कृतं</u> सदैव रक्षिष्यामः।
ग. <u>नदी</u> पर्वतानाम् उच्चेभ्यः स्थलेभ्यः निःसरति।
घ. <u>नागरिकः</u> कार्येषु संलग्नः आसीत् ।
ड. <u>काकस्य</u> गृहं वर्षायां नष्टम् अभवत्।

19. अधोलिखितेषु पदेषु उचितार्थपदैः सह मेलनं कुरुत्–

| | |
|---|---|
| (क) दलम् | (1) निर्गत्य |
| (ख) निःसृत्य | (2) पत्रम् |
| (ग) रिपुः | (3) असत्यम् |
| (घ) अनृतम् | (4) षत्रु |

Edufever™